पेक्षया तृतीये प्रकारे नपुंसके अमरः। तत्र तृतीयाप्रकृतिरिति व्यस्तं पदं समस्तत्वे तृतीयप्रकृतिरित्येव स्यात् व्यस्तपाठं दृष्ट्वा शब्दकल्पद्रुमे तृतीयाप्रकृतिशब्दकल्पनं प्रामादिकम्।

**तृतीययुगपर्य्यय** पु॰ तृतीयस्य युगस्य द्वापररूपस्य पर्य्ययः परिवर्त्तो यत्र काले। द्वापरयुगस्य परिवर्त्ताधारे कलिसन्धिरूपे काले "द्वापरे समनुप्राप्ते तृतीययुगपर्य्यये" भाग॰ १।४।१५ श्लो॰। इतः परं किं भविष्यतीति द्वापरे सन्देहे जाते इत्यर्थः तेन न विरोधः।

**तृतीयसवन** न॰ सूयते सोमोऽस्मिन् कर्म्म॰। कालत्रये सवनत्रयोपेताग्निष्टोमादेः तृतीये सवने। तद्विधानादि ताण्ड्य॰ ब्रा॰ ५।६।१७ भाष्ये उक्तं यथा "तृतीयसवनारम्भमादित्यग्रहमाचरेत्। आर्भवेण स्तुवीताथ पश्वङ्गैः प्रचरत्यथ। सावित्रवैश्वदेवाख्यौ ग्रहौ सौम्यचरुस्तथा। पात्नीवतग्रहादूर्द्ध्वं यज्ञायज्ञीयसंस्तवः। अग्निमारुतशस्त्रं स्यात् गृह्णीयात् हारियोजनम्। समाप्ते सवने पश्चात् कुर्य्यादवभृथं ततः। कुर्य्यादुदयनीयेष्टिमनूबन्ध्यां यजेत गाम्। देविकानिर्वपेद्देवसुवामपि यजूंष्यथ। उपोष्य वेदिमाग्नेयमिष्टाग्निष्टोमसंस्थितिः" "प्रातः सवने नोच्चैः कर्माणि" कात्या॰ श्रौ॰ ८।६।१८ "प्रातः सवने यान्युच्चैः कर्माणि प्रैषोच्चारणादीनि तान्यपि प्रथमस्वरेणैव कार्य्याणि "मन्द्रं प्रातः सवने चरन्तीति" शाखान्तरात्। अतश्चाग्नीदग्नीन्विहरेत्यादयः प्रैषा आश्रावणादयश्च प्रथमस्वरेणैव प्रयोज्याः" कर्कः। "मध्यमेन माध्यन्दिने" १९सू॰ "माध्यन्दिने सवने यानि कर्माणि नीचैर्यानि चोच्चैस्तान्युभयान्यपि मध्यमेन स्वरेण कार्य्याणि शाखान्तरे तथा श्रवणात्" कर्कः। "उत्तमेन तृतीयसवने" २०सू॰ "तृतीयसवने यानि नीचैर्य्यानि च मध्यमेन स्वरेण प्राप्नुवन्ति तानि सर्वाण्युत्तमेन तृतीयेनैव स्वरेण कार्य्याणि तथैव शाखान्तरे श्रुतत्वात्" कर्कः।

**तृतीया** स्त्री तृतीय+टाप्। १चन्द्रमण्डलस्य तृतीयकलाक्रियायां २तदुपलक्षिते कालभेदे च तत्र व्रतादिकालव्यवस्थादि तिथिशब्दे ३२९० पृ॰ दर्शितम्। जन्मनक्षत्रापेक्षया ३तृतीयद्वादशैकविंशात्मकनक्षत्ररूपविपत्तारायाञ्च।

**तृतीयाकृत** त्रि॰ तृतीय+डाच्+कृ—क्त। १त्रिगुणं कृष्टे त्रिवारकृष्टे क्षेत्रादौ।

**तृतीयाश्रम** पुंन॰ कर्म्म॰। वानप्रस्थाश्रमे। "उषित्वैवं गृहे विप्रो द्वितीयादाश्रमात् परम्। वलीपलितसंयुक्तस्तृतीयन्तु समाश्रयेत्" संवर्त्त स॰।

**तृतीयिन्** त्रि॰ तृतीय+अस्त्यर्थे इनि। तृतीयभागार्हे। "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः" मनुः। दक्षिणागोशतविभागे।

**तृत्सु** त्रि॰ तृद—बा॰ सुक्। हिंसके। "गव्या तृत्सुभ्यो अजगन्युधा नॄन्" ऋ॰७।१८।७। "तृत्सुभ्यो हिंसकेभ्य"। भा॰ २राजर्षिभेदे "व्यानवस्य तृत्सवे गयम्" ऋ॰ ७।१८।१३। तृत्सुं राजर्षिभेदम्" भा॰। [प्रतर्द्दनः।

**तृद** हिंसायां भ्वा॰ प॰सक॰ सेट्। तर्द्दति अतर्दीत् ततर्द्द।

**तृद** अनादरे रु॰उभ॰सक॰सेट्। तृणत्ति तृन्ते। इरित् अतर्दीत् अतृदत् अतर्द्दिष्ट। उदित् तर्द्दित्वा-तृत्त्वा। "भूतिं तृणद्मि यज्वानाम्" भट्टिः "ऋतस्य श्लोको वधिरा ततर्द" ऋ॰ ४।२३।८ "ततर्द तरसा विष्णुर्वाणैः शत्रुबलार्द्दनः" हरिवं॰ १२४ अ॰। "सेहे कपीरयाश्चांश्च रिपोस्ततर्द शाखिना" "अतर्दीच्चैव शूलेन कुम्भकर्णः प्लवङ्गमान्" भट्टिः।

**तृदिल** त्रि॰ तृद—बा॰किलच्। १भेदके २भिन्ने च। "तृदिला अतृदिलासः" ऋ॰ १०।९४।११। "तृदिला भेदकाः अतृदिला अभिन्नाः" भा॰।

**तृन्प(म्प)** प्रीणने तु॰ पर॰ सक॰ सेट्। तृपति तृम्पति अतृम्पीत् अतृपीत्। ततृम्प ततृप।

**तृन्फ(म्फ)** प्रीणने तु॰ प॰ सक॰ सेट्। तृफति तृम्फति अतृम्फीत् अतृफीत् ततृम्फ ततृफ।

**तृन्ह** हिंसे तु॰ प॰ सक॰सेट् क्त्वा वेट्। तृंहति तृदित् अतृहत्। ततृंह ततृहतुः ततृंहतुः।

**तृप** प्रीणने स्वा॰पर॰सक॰सेट्। तृप्नोति अतर्पीत्। ततर्प।

**तृप** सन्दीपने प्रीणने च वा चुरा॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰सेट्। तर्पयति ते तर्पति अततर्पत् त अतीतृपत् त। अतर्पीत्। ततर्प तर्तर्पिथ।

**तृप** प्रीणने दि॰पर॰ सक॰वेट् इरित्। तृप्यति अतर्पीत् अत्राप्सीत्-अतार्प्सीत्-अतृपत्। ततर्प।

**तृप** प्रीणने तु॰ पर॰ सक॰ सेट्। तृपति अतर्पीत्। "तृपत्सोमं पाहि" ऋ॰ २।११।१५।

**तृपत** पु॰ तृप। चन्द्रे उणादि॰। [संक्षिप्तसा॰।

**तृपाना** स्त्री तृप—कानच्। १लतायाम् २उषा॰।

**तृपल** न॰तृप—कलच्। १उपले प्रस्तरे। "अपां तमन्युस्तृपलप-